॥ वायुस्तुतिः ॥

॥ ध्यानम् ॥

ओम् उद्यद्रविप्रकरसन्निभमच्युतांके स्वासीनमस्य
नुतिनित्यवचःप्रवृत्तिम् ।
ध्यायेद्गदाभयकरं सुकृतांजलिं तं प्राणं
यथेष्टतनुमुन्नतकर्मशक्तिम् ॥

**॥ श्री नरसिंहनखस्तुतिः ॥**

पांत्वस्मान् पुरुहूतवैरिबलवन्मातंगमाद्यद् घटा-
कुंभोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।
श्रीमत्कंठीरवास्यप्रततसुनखरा दारितारातिदूर-
प्रध्वस्तध्वांतशांतप्रविततमनसा भाविता भूरिभागैः ॥ १ ॥

लक्ष्मीकांत समंततोऽपि कलयन् नैवेशितुस्ते समं
पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्करदक्षनेत्रकुटिलप्रांतोत्थिताग्निस्फुरत्-
खद्योतोपमविष्फुलिंगभसिता ब्रह्मेशशक्रोत्कराः ॥ २ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादकृता श्रीनरसिंहनखस्तुतिः संपूर्णा ॥

ओम् ॥ श्रीमद्विष्ण्वंघ्रिनिष्ठातिगुणगुरुतमश्रीमदानंदतीर्थ -
त्रैलोक्याचार्यपादोज्ज्वलजलजलसत्पांसवोऽस्मान् पुनंतु ।
वाचां यत्र प्रणेत्री त्रिभुवनमहिता शारदा शारदेंदु-
ज्योत्स्नाभद्रस्मितश्रीधवलितककुभा प्रेमभारं बभार ॥ १ ॥

उत्कंठाकुंठकोलाहलजवविदिताजस्रसेवानुवृद्ध–
प्राज्ञात्मज्ञानधूतांधतमससुमनोमौलिरत्नावलीनाम् ।
भक्त्युद्रेकावगाडप्रघटनसधटात्कारसंघृष्यमाण–
प्रांतप्रांग्र्यांघ्रिपीठ् ओत्थितकनकरजःपिंजरा रंजिताशाः ॥ २ ॥

जन्माधिव्याध्युपाधिप्रतिहतिविरहप्रापकाणां गुणाना–
मग्र्याणामर्पकाणां चिरमुदितचिदानंदसंदोहदानाम् ।
एतेषामेष दोषप्रमुषितमनसां द्वेषिणां दूषकाणां
दैत्यानामार्तिमंधे तमसि विदधतां संस्तवे नास्मि शक्तः ॥ ३ ॥

अस्याविष्कर्तुकामं कलिमलकलुषेऽस्मिन् जने ज्ञानमार्गं
वंद्यं चंद्रेंद्ररुद्रद्युमणिफणिवयोनायकाद्यैरिहाद्य ।
मध्वाख्यं मंत्रसिद्धं किमुत कृतवतो मारुतस्यावतारं
पातारं पारमेष्ठ्यं पदमपविपदः प्राप्तुरापन्नपुंसाम् ॥ ४ ॥

उद्यद्विद्युत्प्रचंडां निजरुचिनिकरव्याप्तलोकावकाशो
बिभ्रद्भीमो भुजे योऽभ्युदितदिनकराभांगदाढ्यप्रकांडे ।
वीर्योद्धार्यां गदाग्र्यामयमिह सुमतिं वायुदेवो विदध्याद–
ध्यात्मज्ञाननेता यतिवरमहितो भूमिभूषामणिर्मे ॥ ५ ॥

संसारोत्तापनित्योपशमदसदयस्नेहहासांबुपूर–
प्रोद्यद्विद्यानवद्यद्युतिम णिकिरणश्रेणिसंपूरिताशः।
श्रीवत्सांकाधिवासोचिततरसरलश्रीमदानंदतीर्थ–
क्षीरांभोधिर्विभिंद्याद्भवदनभिमतं भूरि मे भूतिहेतुः ॥ ६ ॥

मूर्धन्येषोऽंजलिर्मे दृढतरमिह ते बध्यते बंधपाश–
च्छेत्रे दात्रे सुखानां भजति भुवि भविष्यद्विधात्रे द्युभर्त्रे ।
अत्यंतं संततं त्वं प्रदिश पदयुगे हंत संतापभाजा–
मस्माकं भक्तिमेकां भगवत उत ते माधवस्याथ वायोः ॥ ७ ॥

साभ्रोष्णाभीशुशुभ्रप्रभमभय नभो भूरि भूभृद्विभूति–
भ्राजिष्णुर्भूऋभूणां भवनमपि विभोऽभेदि बभ्रे बभूवे ।
येन भ्रूविभ्रमस्ते भ्रमयतु सुभृशं बर्भृवद्दुर्भृताशान्
भ्रांतिर्भेदावभासस्त्विति भयमभिभूर्भोक्ष्यतो मायिभिक्षून् ॥ ८ ॥

येऽमुं भावं भजंते सुरमुखसुजनाराधितं ते तृतीयं
भासंते भासुरैस्ते सहचरचलितैश्चामरैश्चारुवेषाः ।
वैकुंठे कंठलग्नस्थिरशुचिविलसत्कांतितारुण्यलीलाल्–
आवण्यापूर्णकांताकुचभरसुलभाश्ले षसम्मोदसांद्राः ॥ ९ ॥

आनंदान्मंदमंदा ददति हि मरुतः कुंदमंदारनंद्या–
वर्त्यामोदान् दधाना मृदपदमुदितोद्गीतकैः सुंदरीणाम् ।
वृंदैरावंद्यमुक्तेंद्वहिमगुमदनाहींद्रदेवेंद्रसेव्ये
मौकुंदे मंदरेऽस्मिन्नविरतमुदयन्मोदिनां देवदेव ॥ १० ॥

उत्तप्तात्युत्कटत्विट्प्रकटकटकटध्वानसंघट्टनोद्य–
द्विद्युद्व्यूढस्फुलिंगप्रकरविकिरणोत्क्वाथिते बाधितांगान् ।
उद्गाढं पात्यमाना तमसि तत इतः किंकरैः पंकिले ते
पंक्तिर्ग्राव्णां गरिम्णा ग्लपयति हि भवद्द्वेषिणो विद्वदाद्य ॥ ११ ॥

अस्मिन्नस्मद्गुरूणां हरिचरणचिरध्यानसन्मंगलानां
युष्माकं पार्श्वभूमिं धृतरणरणिकस्वर्गिसेव्यां प्रपन्नः ।
यस्तूदास्ते स आस्तेऽधिभवमसुलभक्लेशनिर्मोकमस्त-
प्रायानंदं कथंचिन्न वसति सततं पंचकष्टेऽतिकष्टे ॥ १२ ॥

क्षुत्क्षामान् रूक्षरक्षोरदखरनखरक्षुण्णविक्षोभिताक्षा-
नामग्नानंधकूपे क्षुरमुखमुखरैः पक्षिभिर्विक्षतांगान् ।
पूयासृङ्मूत्रविष्ठाकृमिकुलकलिले तत्क्षणक्षिप्तशक्त्या-
द्यस्त्रव्रातादितांस्त्वद्द्विष उपजिहते वज्रकल्पा जलूकाः ॥ १३ ॥

मातर्मे मातरिश्वन् पितरतुलगुरो भ्रातरिष्टाप्तबंधो
स्वामिन् सर्वांतरात्मन्नजर जरयितर्जन्ममृत्यामयानाम् ।
गोविंदे देहि भक्तिं भवति च भगवन्नूर्जितां निर्निमित्तां
निर्व्याजां निश्चलां सद्गुणगणबृहतीं शाश्वतीमाशु देव ॥ १४ ॥

विष्णोरत्युत्तमत्वादखिलगुणगणैस्तत्र भक्तिं गरिष्ठा-
माश्लिष्टे श्रीधराभ्याममुमथ परिवारात्मना सेवकेषु ।
यः संधत्ते विरिंचश्वसनविहगपानंतरुद्रेंद्रपूर्वे-
ष्वाध्यायंस्तारतम्यं स्फुटमवति सदा वायुरस्मद्गुरुस्तम् ॥ १५ ॥

तत्त्वज्ञान् मुक्तिभाजः सुखयसि हि गुरो योग्यतातारतम्या-
दाधत्से मिश्रबुद्धींस्त्रिदिवनिरयभूगोचरान्नित्यबद्धान् ।
तामिस्रांधादिकाख्ये तमसि सुबहुलं दुःखयस्यन्यथाज्ञान्
विष्णोराज्ञाभिरित्थं श्रुतिशतमितिहासादि चाऽकर्णयामः ॥ १६ ॥

वंदेऽहं तं हनूमानिति महितमहापौरुषो बाहुशाली
ख्यातस्तेऽग्र्योऽवतारः सहित इह बहुब्रह्मचर्यादिधर्मैः ।
सस्नेहानां सहस्वानहरहरहितं निर्दहन् देहभाजा-
मंहोमोहापहो यः स्पृहयति महतीं भक्तिमद्यापि रामे ॥ १७ ॥

प्राक् पंचाशत्सहस्रैर्व्यवहितममितं योजनैः पर्वतं त्वं
यावत्संजीवनाद्यौषधनिधिमधिकप्राण लंकामनैषीः ।
अद्राक्षीदुत्पतंतं तत उत गिरिमुत्पाटयंतं गृहीत्वा
यांतं खे राघवांघ्रौ प्रणतमपि तदैकक्षणे त्वां हि लोकः ॥ १८ ॥

क्षिप्तः पश्चात्सलीलं शतमतुलमते योजनानां स उच्च-
स्तावद्विस्तारवांश्चाप्युपलव इव व्यग्रबुद्ध्या त्वयाऽतः ।
स्वस्वस्थानस्थितातिस्थिरशकलशिलाजालसंश्लेषनष्ट-
च्छेदांकः प्रागिवाभूत् कपिवरवपुषस्ते नमः कौशलाय ॥ १९ ॥

दृष्ट्वा दुष्टाधिपोरः स्फुटितकनकसद्वर्म घृष्टास्थिकूटं
निष्पिष्टं हाटकाद्रिप्रकटतटतटाकातिशंको जनोऽभूत् ।
येनाजौ रावणारिप्रियनटनपटुर्मुष्टिरिष्टं प्रदेष्टुं
किं नेष्टे मे स तेऽष्टापदकटकतटित्कोटिभामृष्टकाष्ठः ॥ २० ॥

देव्यादेशप्रणीतिद्रुहिणहरवरावध्यरक्षोविघाता-
द्यासेवोद्यद्दयार्द्रः सहभुजमकरोद्रामनामा मुकुंदः ।
दुष्प्रापे पारमेष्ठ्ये करतलमतुलं मूर्ध्नि विन्यस्य धन्यं
तन्वन् भूयः प्रभूतप्रणयविकसिताब्जेक्षणस्त्वेक्षमाणः ॥ २१ ॥

जघ्ने निघ्नेन विघ्नो बहुलबलबकध्वंसनाद्येन शोच–
द्विप्रानुक्रोशपाशैरसुविधृतिसुखस्यैकचक्राजनानाम् ।
तस्मै ते देव कुर्मः कुरुकुलपतये कर्मणा च प्रणामान्
किर्मीरं दुर्मतीनां प्रथममथ च यो नर्मणा निर्ममाथ ॥ २२ ॥

निर्मृद्नन्नत्ययत्नं विजरवर जरासंधकायास्थिसंधी–
न्युद्धे त्वं स्वध्वरे वा पशुमिव दमयन् विष्णुपक्षद्विडीशम् ।
यावत् प्रत्यक्षभूतं निखिलमखभुजं तर्पयामासिथासौ
तावत्याऽयोजि तृप्त्या किमु वद भगवन् राजसूयाश्वमेधे ॥ २३ ॥

क्ष्वेलाक्षीणाट्टहासं तव रणमरिहन्नुद्गदोद्दामबाहो–
र्बह्वक्षौहिण्यनीकक्षपणसुनिपुणं यस्य सर्वोत्तमस्य ।
शुश्रूषार्थं चकर्थ स्वयमयमथ संवक्तुमानंदतीर्थ–
श्रीमन्नामन् समर्थस्त्वमपि हि युवयोः पादपद्मं प्रपद्ये ॥ २४ ॥

द्रुह्यंतीं हृद्द्रुहं मां द्रुतमनिलबलाद्द्रावयंतीमविद्या–
निद्रां विद्राव्य सद्यो रचनपटुमथाऽपाद्य विद्यासमुद्र ।
वाग्देवी सा सुविद्याद्रविणद विदिता द्रौपदी रुद्रपत्न्याद्युद्रिक्ता–
द्रागभद्राद्रहयतु दयिता पूर्वभीमाऽज्ञया ते ॥ २५ ॥

याभ्यां शुश्रूषुरासीः कुरुकुलजनने क्षत्रविप्रोदिताभ्यां
ब्रह्मभ्यां बृंहिताभ्यां चितिसुखवपुषा कृष्णनामास्पदाभ्याम् ।
निर्भेदाभ्यां विशेषाद्द्विवचनविषयाभ्यामुभाभ्याममूभ्यां
तुभ्यं च क्षेमदेभ्यः सरसिजविलसल्लोचनेभ्यो नमोऽस्तु ॥ २६ ॥

गच्चन् सौगंधिकार्थं पथि स हनुमतः पुच्छमच्छस्य भीमः
प्रोद्धर्तुं नाशकत्स त्वमुमुरुवपुषा भीषयामास चेति ।
पूर्णज्ञानौजसोस्ते गुरुतम वपुषोः श्रीमदानंदतीर्थ
क्रीडामात्रं तदेतत् प्रमदद सुधियां मोहक द्वेषभाजाम् ॥ २७ ॥

बह्वीः कोटीरटीकः कुटिलकटुमतीनुत्कटाटोपकोपान्
द्राक् च त्वं सत्वरत्वाच्छरणद गदया पोथयामासिथारीन् ।
उन्मथ्यातथ्यमिथ्यात्ववचनवचनानुत्पथस्थांस्तथाऽन्या-
न्प्रायच्छः स्वप्रियायै प्रियतमकुसुमं प्राण तस्मै नमस्ते ॥ २८ ॥

देहादुत्क्रामितानामधिपतिरसतामक्रमाद्वक्रबुद्धिः
क्रुद्धः क्रोधैकवश्यः कृमिरिव मणिमान् दुष्कृती निष्क्रियार्थम् ।
चक्रे भूचक्रमेत्य क्रकचमिव सतां चेतसः कष्टशास्त्रं
दुस्तर्कं चक्रपाणेगुणगणविरहं जीवतां चाधिकृत्य ॥ २९ ॥

तद्दुष्प्रेक्षानुसारात्कतिपयकुनरैरादृतोऽन्यैर्विसृष्टो
ब्रह्माऽहं निर्गुणोऽहं वितथमिदमिति ह्येष पाषंडवादः ।
तद्युक्त्याभासजालप्रसरविषतरूद्दाहदक्षप्रमाण-
ज्वालामालाधरोऽग्निः पवन विजयते तेऽवतारस्तृतीयः ॥ ३० ॥

आक्रोशंतो निआशा भयभरविवशस्वाशयाश्छिन्नदर्पा
वाशंतो देशनाशस्त्विति बत कुधियां नाशमाशा दशाऽशु ।
धावंतोऽश्लीलशीला वितथशपथशापाशिवाः शांतशौर्या-
स्त्वद्व्याख्यासिंहनादे सपदि ददृशिरे मायिगोमायवस्ते ॥ ३१ ॥

त्रिष्वप्येवावतारेष्वरिभिरपघृणं हिंसितो निर्विकारः
सर्वज्ञः सर्वशक्तिः सकलगुणगणापूर्णरूपप्रगल्भः ।
स्वच्छः स्वच्छंदमृत्युः सुखयसि सुजनं देव किं चित्रमत्र
त्राता यस्य त्रिधामा जगदुत वशगं किंकराः शंकराद्याः ॥ ३२ ॥

उद्यन्मंदस्मितश्रीमृदुमधुमधुरालापपीयूषधारा–
पूरासेकोपशांतासुखसुजनमनोलोचनापीयमानम् ।
संद्रक्ष्ये सुंदरं संदुहदिह महदानंदमानंदतीर्थ
श्रीमद्वक्त्रेंदुबिंबं दुरितनुदुदितं नित्यदाहं कदा नु ॥ ३३ ॥

प्राचीनाचीर्णपुण्योच्चयचतुरतराचारतश्चारुचित्ता–
नत्युच्चां रोचयंतीं श्रुतिचितवचनां श्रावकांश्चोद्यचुंचून् ।
व्याख्यामुत्खातदुःखां चिरमुचितमहाचार्य चिंतारतांस्ते
चित्रां सच्छास्त्रकर्तश्चरणपरिचरांछ्रावयास्मांश्च किंचित् ॥ ३४ ॥

पीठे रत्नोपक्लृप्ते रुचिररुचिमणिज्योतिषा सन्निषण्णं
ब्रह्माणं भाविनं त्वां ज्वलति निजपदे वैदिकाद्या हि विद्याः ।
सेवंते मूर्तिमत्यः सुचरित चरितं भाति गंधर्वगीतं
प्रत्येकं देवसंसत्स्वपि तव भगवन्नर्तितद्योवधूषु ॥ ३५ ॥

सानुक्रोशैरजस्रं जनिमृतिनिरयाद्यूर्मिमालाविलेऽस्मिन्
संसाराब्धौ निमग्नांछरणमशरणानिच्छतो वीक्ष्य जंतून् ।
युष्माभिः प्रार्थितः सञ्जलनिधिशयनः सत्यवत्यां महर्षे–
र्व्यक्तश्चिन्मात्रमूर्तिर्न खलु भगवतः प्राकृतो जातु देहः ॥ ३६ ॥

अस्तव्यस्तं समस्तश्रुतिगतमधमै रत्नपूगं यथांधै-
रर्थं लोकोपकृत्यै गुणगणनिलयः सूत्रयामास कृत्स्नम् ।
योऽसौ व्यासाभिधानस्तमहमहरहर्भक्तितस्तत्प्रसादा-
त्सद्यो विद्योपलब्ध्यै गुरुतममगुरुं देवदेवं नमामि ॥ ३७ ॥

आज्ञामन्यैरधार्यां शिरसि परिसरद्रश्मिकोटीरकोटौ
कृष्णस्याक्लिष्टकर्मा दधदनुसरणादर्थितो देवसंघैः ।
भूमावागत्य भूमन्नसुकरमकरोर्ब्रह्मसूत्रस्य भाष्यं
दुर्भाष्यं व्यस्य दस्योर्मणिमत उदितं वेदसद्युक्तिभिस्त्वम् ॥ ३८ ॥

भूत्वा क्षेत्रे विशुद्धे द्विजगणनिलये रूप्यपीठाभिधाने
तत्रापि ब्रह्मजातिस्त्रिभुवनविशदे मध्यगेहाख्यगेहे ।
पारिव्राज्याधिराजः पुनरपि बदरीं प्राप्य कृष्णं च नत्वा
कृत्वा भाष्याणि सम्यग् व्यतनुत च भवान् भारतार्थप्रकाशम् ॥ ३९ ॥

वंदे तं त्वा सुपूर्णप्रमतिमनुदिनासेवितं देववृंदै-
र्वंदे वंदारुमीशे श्रिय उत नियतं श्रीमदानंदतीर्थम् ।
वंदे मंदाकिनीसत्सरिदमलजलासेकसाधिक्यसंगं
वंदेऽहं देव भक्त्या भवभयदहनं सज्जनान्मोदयंतम् ॥ ४० ॥

सुब्रह्मण्याख्यसूरेः सुत इति सुभृशं केशवानंदतीर्थ-
श्रीमत्पादाब्जभक्तः स्तुतिमकृत हरेर्वायुदेवस्य चास्य ।
तत्पादार्चादरेण ग्रथितपदलसन्मालया त्वेतया ये
संराध्यामू नमंति प्रततमतिगुणा मुक्तिमेते व्रजंति ॥ ४१ ॥

॥ इति कविकुलतिलकश्रीमत्त्रिविक्रमपंडिताचार्यकृता वायुस्तुतिः संपूर्णा ॥

## ॥ श्री नरसिंहनखस्तुतिः ॥

पांत्वस्मान् पुरुहूतवैरिबलवन्मातंगमाद्यद् घटा–
कुंभोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।
श्रीमत्कंठीरवास्यप्रततसुनखरा दारितारातिदूर–
प्रध्वस्तध्वांतशांतप्रविततमनसा भाविता भूरिभागैः ॥ १ ॥

लक्ष्मीकांत समंततोऽपि कलयन् नैवेशितुस्ते समं
पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्करदक्षनेत्रकुटिलप्रांतोत्थिताग्निस्फुरत्–
खद्योतोपमविष्फुलिंगभसिता ब्रह्मेशशक्रोत्कराः ॥ २ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादकृता श्रीनरसिंहनखस्तुतिः संपूर्णा ॥